# कनकधारा स्तोत्रं

वंदे वंदारु मंदारं इंदिरानंदकंदलम् ।
अमंदानंदसंदोहबंधुरं सिंधुरननम् ॥

अंगं हरेः पुलकभूषण माश्रयंती
भृंगांगनेव मुकुलाभरणं तमालम् ।
अंगीकृताखिल विभूति रपांगलीला
मांगल्यदास्तु मम मंगलदेवतायाः ॥ 1

मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपा प्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसंभवायाः ॥ 2

विश्वामरेंद्रपदविभ्रमदानदक्षं
आनंद हेतु रधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्धं
इंदीवरोदर सहोदर मिंदिरायाः ॥ 3

आमीलिताक्षमधिगम्य मुदा मुकुंदं
आनंदकंदमनिमेष मनंगतंत्रम् ।
आकेकरस्थितकनीनिक पक्ष्मनेत्रं
भूत्यै भवेन्मम भुजंगशयांगनायाः ॥ 4

© 2022 Vedam Nadam

कालांबुदालिललितोरसि कैटभारेः
धाराधरे स्फुरति या तटिदंगनेव ।
मातुस्समस्तजगतां महनीयमूर्तिः
भद्राणि मे दिशतु भार्गवनंदनायाः ॥ 5

बाह्वंतरे मुरजितः श्रितकौस्तुभे या
हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला
कल्याणमावहतु मे कमलालयायाः ॥ 6

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात्
मांगल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत् तदिह मंथर मीक्षणार्धं
मंदालसं च मकरालयकन्यकायाः ॥ 7

दद्याद्दयानुपवनो द्रविणांबुधारां
अस्मिन्नकिंचन विहंगशिशौ विषण्णे ।
दुष्कर्मघर्ममपनीय चिराय दूरं
नारायणप्रणयिनी नयनांबुवाहः ॥ 8

इष्टा विशिष्टमतयोऽपि यया दयार्द्र-
दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ॥ 9

© 2022 Vedam Nadam

गीर्देवतेति गरुडध्वजसुंदरीति
शाकंभरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै
तस्यै नमस्त्रिभुवनैक गुरोस्तरुण्यै ॥ 10

श्रुत्यै नमोऽस्तु शुभकर्मफ़लप्रसूत्यै
रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ 11

नमोऽस्तु नालीकनिभाननायै
नमोऽस्तु दुग्धोदधि जन्मभूम्यै ।
नमोऽस्तु सोमामृत सोदरायै
नमोऽस्तु नारायण वल्लभायै ॥ 12

नमोऽस्तु हेमांबुजपीठिकायै
नमोऽस्तु भूमंडलनायिकायै ।
नमोऽस्तु देवादि दयापरायै
नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥ 13

नमोऽस्तु देव्यै भृगुनंदनायै
नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदरवल्लभायै ॥ 14

नमोऽस्तु कांत्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।
नमोऽस्तु देवादिभि रर्चितायै
नमोऽस्तु नंदात्मजवल्लभायै ॥ 15

संपत्कराणि सकलेंद्रियनंदनानि
साम्राज्यदानविभवानि सरोरुहाक्षि ।
त्वद्वंदनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयंतु नान्ये ॥ 16

यत्कटाक्षसमुपासनाविधिः
सेवकस्य सकलार्थसंपदः ।
संतनोति वचनांगमानसैः
त्वां मुरारिहृदयेश्वरीं भजे ॥ 17

सरसिजनिलये! सरोजहस्ते!
धवलतमांशुकगन्धमाल्यशोभे ।
भगवति! हरिवल्लभे! मनोज्ञे!
त्रिभुवनभूतिकरि! प्रसीद मह्यम् ॥ 18

दिग्घस्तिभिः कनककुंभमुखावसृष्ट-
स्ववर्वाहिनी, विमलचारुजलप्लुतांगीम् ।
प्रातर्नमामि जगतां जननीमशेष-
लोकाधिनाथगृहिणीं, अमृताब्धिपुत्रीम् ॥ 19

कमले! कमलाक्षवल्लभे! त्वं
करुणापूर तरंगितैरपांगैः ।
अवलोकय माममकिंचनानां
प्रथमं पात्रमकृत्रिमं दयायाः ॥ 20

बिल्वाटवीमध्यलसत् सरोजे!
सहस्रपत्रे सुखसन्निविष्ठाम् ।
अष्ठापदांभोरुह पाणिपद्मां
सुवर्णवर्णां प्रणमामि लक्ष्मीम् ॥ 21

कमलासनपाणिना ललाटे
लिखितामक्षरपंक्तिमस्य जंतोः ।
परिमार्जय मातरंघ्रिणा ते
धनिकद्वार निवास दुःखदोग्ध्रीम् ॥ 22

अंभोरुहं जन्मगृहं भवत्याः
वक्षस्थलं भर्तृगृहं मुरारेः ।
कारुण्यतः कल्पय पद्मवासे
लीलागृहं मे हृदयारविंदम् ॥ 23

स्तुवंति ये स्तुतिभिरमूभिरन्वहं
त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतर भाग्यभागजिनः
भवन्ति ते भुवि बुधभाविताशयाः ॥ 24

सुवर्णधारास्त्रोत्रं यच्छंकराचार्यनिर्मितम् ।
त्रिसंध्यं यः पठेन्नित्यं स कुबेरसमो भवेत् ॥

॥ इति श्रीमच्छंकर भगवत्पाद कृतं कनकधारा स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam